|| श्रीः ||

जयकृष्णदास आयुर्वेद ग्रन्थमाला

१४

अभिधानरत्नमाला

(षड्रसनिघण्टुः)

सम्पादकः

आचार्यः प्रियव्रतशर्मा

काशी-हिन्दू-विश्वविद्यालयीय-द्रव्यगुणविभागाध्यक्षः

वाराणसी

चौखम्भा ओरियन्टालिया

प्राच्यविद्या एवं दुर्लभ ग्रन्थों के प्रकाशक तथा विक्रेता

वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२
गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन
वाराणसी–२२१००१ (भारत)
टेलीफोन : ६३०२२ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर
दिल्ली–११०००७

प्रथम संस्करण १९७७

मूल्य रु० १५–००

अन्य प्राप्तिस्थान

चौखम्भा विश्वभारती

चौक (चित्रा सिनेमा के सामने)
वाराणसी
फोन : ६५४४४

JAIKRISHNADAS AYURVEDA SERIES
NO. 14

ABHIDHĀNARATNAMĀLĀ

(ṢAḌRASANIGHAṆṬUḤ)

Edited by
Prof. PRIYAVRAT SHARMA
Head, Department of Dravyaguṇa
Formerly Director, Postgraduate Institute of Indian Medicine
Banaras Hindu University, Varanasi

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI DELHI

Publishers

CHAUKHAMBHA ORIENTALIA
P. O. Chaukhambha, Post Box No. 32
Gokul Bhawan, K. 37/109, Gopal Mandir Lane
VARANASI–221001 (India)
Telephone : 63022 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar
DELHI–110007

First Edition, 1977
Price : Rs. 15-00

Printers—Vidya Vilas Press, Varanasi.



आचार्य प्रियव्रत शर्मा

INTRODUCTION

Abhidhāna-Ratnamālā or Ṣaḍrasa Nighaṇṭu is one of the Nighaṇṭus in synonymous style. This is comparatively less known in northern India while in south it was published more than once (Madras 1881, 1928, 1938). But looking to the fact that the text still required a through checking, the present edition has been taken up.

Materials :

The following materials were used as basis for this work :—

1. Ms. 1—Ṣaḍrasa Nighaṇṭu (with Āndhra Ṭīkā)— transcribed copy of the Ms. No. D 13257 of Govt. Oriental Mss. Library, Madras.
2. Ms. 2—Abhidhānaratnamālā or Ṣaḍrasa Nighaṇṭu-microfilmed copy of the Ms. No. (Samskrit Mss.) K 6245 Buhler 245 of India Office Library, London.
3. Ms. 3—Ṣaḍrasanighaṇṭu (Abhidhānaratnamālā) Microfilmed copy of the text publisned by Chennapuri Vavilla Rama Swamy Sastrulu and Sons, Madras, 1939 (preserved In the Indian Institute of History of Medicine, Hyderabad).

Style and Contents :

The subject matter of Abhidhāna-Ratnamālā is arranged in six chapters (Skandhas) according to six Rasas that is why it is commonly known as Ṣaḍrasa

Nighaṇṭu. Classification of drugs in six groups according to Rasa has been done in ancient works like Caraka Saṁhita and Suśruta Saṁhita where they are known as Skandhas and Vargas respectively.

In the begining of the chapters all the drugs described therein are enumerated, thereafter the drugs are described one by one in the same order with the synonyms.

Rasa being the criteria of classification, all types of drug—vegetable, animal products as well minerals are included in respective groups.

The number of drugs included in various groups is as follows :

1. Madhura Skandha	—	102
2. Amla Skandha	—	32
3. Lavaṇa Skandha	—	11
4. Tikta Skandha	—	128
5. Kaṭu Skandha	—	70
6. Kaṣāya Skandha	—	115

The author and his date :

As there is no any indication about the author, it is not possible to say anything about him. However, in Ms. no. 1, there is the following sentence at the end of the text :

'सकलनिघण्टुसारसमुद्राद्रत्नान्यादाय इत्यभिधान-
रत्नमालायां चतुररचिताग्रजेन तदेव लिखितम् ।'

From this, it may be inferred that the work was composed by a person who was elder brother of Catura Racita (Rakṣita ?). No more information is available about the author. As regards the date of this work, the most important clue to decide it is the quotation of

the work by the illustrious commentator, Mallinātha. He has quoted the verses from this work more than once[1] which shows its popularity at that time. The date of Mallinātha has been fixed as 14th cent. A. D.[2] On this basis, this work may be placed in 12th or 13th cent. A. D.

Most of the descriptions tally with those in the Aṣṭāṅga Nighaṇṭu which has been placed in 8th cent. A. D.[3]

Value of the work :

The text though containing only synonyms is valuable because it gives many new informations about drugs. For instance, Kaṭabhī and Kiṇihī have been mentioned by the commentators as synonyms and is also recognised as such by the modern scholars but in the present text they have been read separately in Tikta Skandha which evidently shows that the author regarded them as different plants. A quite new information has been given about Pārāvata (Āmla Skandha) by mentioning 'Rudrākṣa' as one of the synonyms. Although it is not safe to rely on the author in every respect, it is equally pertinent that these facts deserve consideration and scrutiny.

---

१. जम्बूः सुरभिपत्रा च राजजम्बूर्महाफला-इत्यभिधानरत्नमालायाम् ।

—शिशुपालवध, १।१९

शाकः पलाशसारः स्याद् वरदारुः खरच्छदः ।

महापत्रो महाशाकः स्थिरदारुर्हनीटकः ॥ इत्यभिधानरत्नमालायाम् ।

—शिशुपालवध, १६।१८

२. बलदेव उपाध्यायः : संस्कृत शास्त्रों का इतिहास, पृ० २४५

3. P. V. Sharma : Introduction, Āṣṭaṅga Nighaṇṭu, Madras, 1973.

Rasa is the most important among Guṇas of the drug which on one side indicates the Bhautika composition of the drug and on the other side predicts its action on the body (Doṣas, Dhātus and malas). The extraordinary privilege of Rasa is its perceivable nature which distinguishes it from other properties and also gives a concrete tool for pharmacodynamics. A physician having perceived the Rasa of a drug can easily predict its pharmacodynamic action in most cases. Hence, the classification of drugs according to Rasa is the most practical one and has the highest utility in therapeutic field.

It will not be out place to discuss pharmacodynamics of Rasas.

Rasas and their pharmacodynamic importance :

Madhura (Sweet), Amla (Acid), Lavaṇa (Saline), Tikta (Bitter), Kaṭu (Pungent) and Kaṣāya (Astringent)—these six Rasas have been recognised in Āyurveda. They are not only physiological preceptions but act as indicators of the Bhautika compositon of the drugs as follows :

1. Madhura	-	Pṛthivī	—	Ap
2. Amla	-	Pṛthivī	—	Agni
3. Lavaṇa	-	Ap	—	Agni
4. Tikta	-	Vāyu	—	Ākāśa
5. Kaṭu	-	Vāyu	—	Agni
6. Kaṣāya	-	Vāyu	—	Pṛthivī

Among these, Tikta, Kaṭu and Kaṣāya are Vāyavya Rasas and as such increase the Vāta doṣa while the other three decrease it. Kaṭu, Amla and Lavaṇa are Āgneya Rasas which stimulate the Agni (Pitta) element of the body while the other three are Saumya

Rasas which pacify the same. Similarly, Madhura, Amla and Lavaṇa are Pārthivāpya Rasas which increase the Similar Kapha doṣa while the other three decrease it. Some anomaly appears regarding Kaṣāya Rasa which has got both Vāyu and Pṛthivī which are opposite to each other in properties but this may be


Table 1

Rasas as aetiological factors and therapeutic agents.

Rasa	*Disorders caused by excessive use*	*Therapeutic indications*
1 Madhura	Obesity, diabetes, anorexia, respiratory disorders, worms, abnormal growths.	General debility, dysuria, emaciation, vātika and Paittika disorders.
2 Amla	Blood disorders, inflammations, acidity, haemorrhage, vertigo.	Loss of appeite, indigestion, Vātika disorders.
3 Lavaṇa	Impotency, œdema, haemorrhage, gastritis, skin disorders, greying and falling of hairs.	Digestive disorders, expectorant, Vātika disorders.
4 Tikta	Emaciation, vertigo, dryness, nervous disorders, general debility.	Loss of appetite, digestive disorders, acid gastritis, worms, fever, poison, disorder due to Kapha and pitta.
5 Kaṭu	Impotency, fainting, vertigo; debility, Inflammation, thirst.	Loss of appetite, indigestion anti-obesity, anthelmintic, disorders due to Kapha and Vāta.
6 Kaṣāya	Dryness, cardiac pain, obstruction in channels, impotency, nervour disorders.	Excessive secretions, (diarrhoea; Polyuria), haemorrhage, ulcers, disorders due to Kapha and Pitta.

reconciled by the reasoning that Vāyu is predominant here and due to this the properties opposite to Vāyu are suppressed and the properties of Vāyu like Khara, Rūkṣa and Śīta are pronounced.

EFFECT OF RASAS ON DOṢAS



The applied aspect of Rasas is more important and interesting. They act as therapeutic agents in diseases. For example, Madhura Rasa when used excessively may cause obesity, diabetes, respiratory disorders, worms, filaria and abnormal growths etc. (See table 1) :

Acknowledgements :

I am thankful to the authorities of India Office Library, London and Govt. Oriental Manuscripts Library, Madras for having supplied the microfilm and

transcribed copy of the manuscripts. I am grateful to Dr. D. V. Subba Reddy, formerly Director, Indian Institute of History of Medicine, Hyderabad for having sent me the microfilm of the printed text from his library. I also express my thanks to the library staff of our Institute for rendering help by permitting access to these manuscripts. I am also thankful Pt. Radha Kant Ojha for having prepared the copies of the Mss. and also the press copy. Finally, the publishers deserve hearty thanks for their strong determination to publish the rare and unknown manuscripts in the field of Āyurveda.

Banaras Hindu University,
Varanasi.
March 31, 1977

P. V. Sharma

विषय-सूची

अभिधानरत्नमाला

(षड्रसनिघण्टुः)

॥ श्रीगणेशाय नमः ॥

येन केनापि यद्यद् वा यस्य कस्यचिदीरितम् ।
नाम तत्तत्तदीयं स्यात्तां नमामि जगन्मयीम्[1] ॥ १ ॥
सर्वतन्त्रप्रयुक्तानि नामान्यादाय सर्वशः[2] ।
रसभेदेन षट्स्कन्धो निघण्टुरभिधीयते ॥ २ ॥

१. तत्राद्यः स्वादुस्कन्धः[3]

आज्यक्षौद्रतिलोत्थदुग्धनवनीताम्भोविदारीवरी,
काकोलीकपिकच्छुगोपतनयामेदापयस्याद्वयम् ।
खर्जूरीतृणराण्मधूकयुगलं पर्णीचतुष्कं कुश-
द्राक्षाकाशयुगं सितोपलबलादूर्वात्रयं गोक्षुरम् ॥ ३ ॥
चोचाक्षोटकराजवृक्षसुषवीचारेक्षुपारेवताः,
त्वक्क्षीरीपनसद्विवृद्धिकदलीजीवर्षभाम्रस्वनाः ।
पद्मा मस्तकमञ्जरीक्षुरनली खट्वा द्रवन्त्युत्कटा,
देवा स्वस्तिरुपोदकी नलमधूका लक्ष्मणा शूलिनी[5] ॥ ४ ॥
कार्पासी[6] प्रियसत्यगस्त[7]मुषकानन्तासतीनच्छदा,
वत्सादन्यथ रक्तनालमधुराभूकन्दशृंगाटकाः[8] ।
स्थौणेयं कक्कुभाण्डमूत्रलकलिङ्गालाबुधामार्गवः,
सिक्थं[9] हेमसशूकशिम्बिजगणः स्कन्धः किल स्वादुभिः ॥५॥

---

१. तं नमामि गजाननम् १ — २. षड्विधा ३
३. तत्र आज्यस्कन्धः १ — ४. सितात्रयबला ३
५. मूलिनी १ — ६. कापीस १
७. प्रियवत्यगस्त २ — ८. मधुका १ — ९. हेमस्निग्धक १

एषां क्रमेणाभिधानं वक्ष्यते—

घृतमाज्यं हविः सर्पिः पवित्रममृतश्च तत् ।
क्षौद्रं पुष्परसोद्भूतं सारघं[1] मधु माक्षिकम् ॥ ६ ॥
तैलं तिल्यं तिलभवं त्वच्यं[2] तिलरसं स्मृतम् ।
दुग्धं क्षीरं पयः स्तन्यमोजस्यं[3] शिशुवर्धनम् ॥ ७ ॥
हैयङ्गवीनं दधिजं घृताज्यं नवनीतकम् ।
पानीयमापः कीलालं नीरकं[4] सलिलं जलम् ॥ ८ ॥
अमृतं जीवनं तोयं वार्यम्बूदकं पयः ।
विदारी गजवाजीष्टा स्वादुवृष्येक्षु[5]गन्धिका[6] ॥ ९ ॥
शृगालिका वृष्यवल्ली शुक्लकन्दा विदारिका[7] ।
क्षीरेक्षुवल्लिकन्दा स्यात् क्षीरशुक्ला पयस्विनी ॥ १० ॥
वल्लीपलाशिका क्षीरविदारी[8] श्रेष्ठकन्दकः[9] ।
फणिजिह्वा केश्यभीरुः पीवरीन्दीवरी वरी ॥ ११ ॥
सूक्ष्मपत्रा द्वीपिशत्रुः शतमूली शतावरी ।
तुङ्गिनी बहुपुत्रा च द्वीपिनी[10] चोर्ध्वकण्टका ॥ १२ ॥
काकोली कबरी वीरा मधुरा वायसोलिका[11] ।
क्षीरकाकोलिका क्षीरशुक्ला सा जीवकोलिका[12] ॥ १३ ॥
ऋष्यप्रोक्ता महागुप्ता कपिरोमफला च सा ।
मर्कटी चात्मगुप्ता च कण्डूरा कपिकच्छुका ॥ १४ ॥

---

१. सारसं१,३ — २ स्वच्छं३
३. उरस्यं३ — ४. नीलकं१
५. वृक्षेक्षु३ — ६. कन्दकः२
७. शुक्लकन्दफला च सा२ — ८. फलाशुक १,२
९. श्लेष्मकन्दकः३ — १०. दीपनी३
११. पयसालिका२ — १२. जीवकालिका३

ऋषभी जाङ्गली[1] कण्डूकरी शार्दूलविग्रहा[2] ।
कन्या गोपी कृष्णवल्ली सारिवा[3] फणिजिह्विका ॥ १५ ॥
सुगन्धिमूला भद्रा च सुगन्धा गोपवल्ल्यपि ।
कालानुसारी[4] बस्तान्त्री चन्दनोत्पलसारिवा ॥ १६ ॥
प्रतानिका शारदा च कुष्ठकोष्ठा च सारिवा ।
शल्यपर्णी मणिच्छिद्रा मेदा मेदःसमुद्भवा ॥ १७ ॥
महामेदा देवमणिर्वसुच्छिद्रा च जीवनी ।
महापुरुषदन्ता च सैव[5] वृक्षरुहा स्मृता ॥ १८ ॥
जीवन्ती जीवनी जीवा शाकश्रेष्ठा[6] सुमङ्गला ।
शृङ्गरीटी[7] पोटगला पयस्या चार्कपुष्पिका ॥ १९ ॥
दुरारोहा खरस्कन्धा खर्जूरी स्वादुमस्तका ।
परुषको मृदुफलो रोषणो धन्वनच्छदः ॥ २० ॥
तृणराजो लेख्यपत्रस्तालो दीर्घतरुध्वजः[8] ।
चिरपाकी कृष्णकायस्त्रिबीजः स्वल्पवर्चसः[9] ॥ २१ ॥
हिन्ताली तु महाताली कुताली तृणपुष्पिका ।
बहुस्कन्धा मृत्युफला गूढपाकी[10] शिलाफला[11] ॥ २२ ॥
डोलाफलस्तीक्ष्णसारो मधूको गुडपुष्पकः ।
मधुपुष्पो लोध्रपुष्पो वानप्रस्थो मधुद्रुमः ॥ २३ ॥

---

१. ऋषबीजाङ्गुली१ २. करिसा१
३. कारिणी२ ४. "कालानुरसा प्रतानीक शारदा कुष्टसारिवा"१
५. सैव३ ६. शारवाश्रेष्ठा चार्कपुष्पिका२
७. शृंगवेरी३ ८. दीर्घतरुस्तथा३
९. सल्लकी च सः २ १० गुड़पाकी३
११. सिताफला१
(११क) पांडुलिपि २ में श्लोक सं० २३ से ५९ तक श्लोक नहीं है।

गौरीवासो ह्रस्वपुष्पो मधुष्ठीला[1] मधूलिका ।
काकमुद्रा क्षुद्रसहा ह्रस्वा पित्तहरा च सा ॥ २४ ॥
मुद्गपर्णी महासूप्यपर्णी मार्जारगन्धिका ।
पिशाची सिंहविन्ना चः माषपर्णी महासहा ॥ २५ ॥
स्वादुमाषा हंसमाषा पाण्डुरोमशपर्णिका ।
विदारिगन्धांशुमती शालपर्णी स्थिरा ध्रुवा[2] ॥ २६ ॥
त्रिपर्णी त्रिगुहा[3] सौम्या महाक्लीतनिका मता ।
पृश्निपर्णी पृथक्पर्णी[4] कलशी क्लीतनी गुहा ॥ २७ ॥
शृगालविन्ना[5] लांगूली क्रोष्टुपुच्छी महागुहा ।
खरस्तु वीरणश्रेणी[6] मृदुदर्भः कुशो लवः ॥ २८ ॥
कालमांसी[7] मृदुफला द्राक्षा काश्मीरजा मता ।
मृद्वीका गोस्तनी द्राक्षा स्वादुपूरा[8] फलोत्तमा ॥ २९ ॥
मधुयोनिः स्वादुफला चोत्तरापथिका[9] स्मृता ।
अथेक्षुकुसुमो बाणः स्यात् काण्डशर इक्षुकः ॥ ३० ॥
इक्ष्वालिका तु काशेक्षुः काण्डेक्षुर्वायसेक्षुकः ।
श्वेतचामरकः काशो गुन्द्रा स्याद् गुच्छपुष्पिका ॥ ३१ ॥
मत्स्यण्डिका त्वभिच्छत्रा शर्करा सिकता सिता ।
सितोपला मधूत्था[10] तु माक्षिकी[11] मधुशर्करा ॥ ३२ ॥

---

१. मधुश्रेणी३ २. द्रुमा१
३. त्रिगुणा३ ४. पृथक्कर्णी१
५. गुहासौम्य१ ६. रदजक्षीरी१
७. कलामांसी३ ८. वारशूला१
९. पृथुका३ १०. मधूद्धातु१
११. माधवी३

यवासशर्करा त्वन्या निर्दुष्टा[१] यासशर्करा ।
वाट्यालको वाट्यपुष्पी ऋष्यप्रोक्ता बलाभिधा[२] ॥ ३३ ॥
भद्रौदनी शीतकरी सैव क्षुद्रबला स्मृता ।
वाट्यायनी त्वतिबला भारद्वाजी सुपर्णिका ॥ ३४ ॥
महाबला वर्षपुष्पी[३] पीतपुष्पी बृहद्बला ।
गांगेरुकी नागबला खरगन्धा निशाङ्कुशा ॥ ३५ ॥
विश्वदेवा झषा काला तथा ह्रस्वगवेधुका ।
सहस्रवीर्या गोलोमी सितानन्ता गणप्रिया[४] ॥ ३६ ॥
नीलदूर्वा तु हरिता शाद्वला चासिता तु सा ।
महादूर्वा तु गण्डाली वारुणी शकुलाक्षिका ॥ ३७ ॥
त्रिकण्टकः श्वदंष्ट्रा च गोक्षुरः कण्टकक्षुरः[५] ।
व्यालदंष्ट्रा कण्टफलः[६] स्थलशृंगाटकश्च सः ॥ ३८ ॥
चोचस्त्र्यक्षो नारिकेलः सुतुङ्गः कूर्चकेशरः ।
नीरन्ध्रो दृढफलो करीरः फलिनी तथा ॥ ३९ ॥
आक्षोटः पर्वतीयश्च फलस्नेहो[७] गुडाश्रयः ।
कीरेष्टः[८] कर्परालश्च स्वादुमज्जा पृथुच्छदः ॥ ४० ॥
राजादनो वानरेष्टः क्षीरी[९] राजाह्वयद्रुमः ।
राजराजा तु पानीयवल्ली सुषविकाफला ॥ ४१ ॥
प्रियालस्तु खरस्कन्धः चारो[१०] बहुलवल्कलः ।
घनमूलो [११]रसस्त्विक्षुर्गुडमूलोऽसिपत्रकः[१२] ॥ ४२ ॥

---

१. निर्दिष्टा१
२. बलाह्वका१
३. त्वतिबला१
४. सितानन्तसमुद्भवा३
५. कण्टगोक्षुरः१
६. कटुफला३
७. फलस्नेहो३
८. क्षीरेक्षुः३
९. क्षीरी राजाह्वयद्रुमः३
१०. क्षारो१
११. रसालेक्षु३
१२. सुपत्रिकः३

कान्तारः स्यात् कर्कटिकः पौण्ड्रकस्तु रसालकः ।
पारेवतं रैवतकं[1] रक्तं चाम्रावकं मतम् ॥ ४३ ॥
तुगाक्षीरी तुका शुभ्रा[2] वंशाख्या वंशरोचना[3] ।
त्वक्क्षीरी वैणवी वंश्या रोचना तृणकेसरी[4] ॥ ४४ ॥
पनसः स्यात् स्निग्धफलः स्वर्गभूर्बहुकण्टकः ।
महास्वादुर्मूलफलो बहिर्गन्धिः महाफलः ॥ ४५ ॥
वृद्धिः श्रवणपुष्पी स्यान्महाश्रावणिरुच्यते[5] ।
रम्भा मोचा वृत्तपुष्पा[6] कदली ह्यविषाणिका ॥ ४६ ॥
सुकुमारा कन्दरुहा निस्सारा दीर्घपत्रिका ।
जीवकः कूर्चशीर्षश्च ह्रस्वाङ्गश्चिरजीव्यपि[7] ॥ ४७ ॥
विषाणी ककुद[8]ः श्रीमान् ऋ[9]षभो वृषनामकः ।
तण्डुलीयस्तुण्डभटो भण्डीरो घननामकः ॥ ४८ ॥
पद्मा सीताव्यथावर्त्ता चारटी पद्मचारिणी ।
श्रीहस्तिनी कुरटका पिचुकः शितिवारकः ॥ ४९ ॥
कृष्णसूक्ष्मफला चैव तथा मस्तकमंजरी ।
पर्वमूलेक्षुरः स्थूलकण्टकः कोकिलाक्षकः ॥ ५० ॥
नालिका विद्रुमलता कपोतांघ्रि[10]र्नटी नली ।
दधिपुष्पा तु कथिता खट्वा पर्यंकपालिका ॥ ५१ ॥
न्यग्रोधाह्वा द्रवन्ती स्यात् पर्वश्रेणी रुषी श्रवा ।
प्रत्यक्श्रेणी रुषा रण्डा शम्बरी श्रावणी च सा ॥ ५२ ॥

---

१. कैवतकं१
२. वंशरोचनम्१
३. तवक्षीरी तुका क्षीरा३
४. तृणकेतकी३
५. महावृद्धिर्निरुच्यते३
६. वृत्तफला१
७. स्थिरजीवणि१
८. ककुभः३
९. वृषभो३
१०. कपोतचटका(रणा?) नली१

उत्कटा सूक्ष्मपत्रा च दीर्घा लोहितपत्रिका ।
शतवीर्या स्वर्णपुष्पी खरवृक्षा सुधा स्मृता[१] ॥ ५३ ॥
सहदेवा[२] देवसहा देवा गन्धोत्पलाह्वया ।
सुनिषण्णः सूक्ष्मपत्रः स्वस्तिकश्च चतुर्दलः ॥ ५४ ॥
उपोदकमुपोदी च वायसी कर्कटप्रिया ।
मृदुपुष्पः शून्यमध्यो नलिको नलको नलः ॥ ५५ ॥
यष्टीमधुकं यष्ट्याह्वं मधुकं क्लीतकाह्वयम् ।
लक्ष्मणा पुत्रजननी रक्तबिन्दुच्छदा[३] तथा ॥ ५६ ॥
शूलिनी नागिनी लक्ष्मी मत्स्याक्षी समुदाहृता ।
वामन्याच्छादनफला[४] वाटचा[५] कार्पाससंज्ञिका ॥ ५७ ॥
मत्स्याक्षी काकपुष्पी च पत्तूरः प्रियसत्यपि ।
अगस्त्यको[६] मुनिनामा[७] केषांचिन्मधुशिग्रुकः ॥ ५८ ॥
वास्तुको मूषकः प्रोक्तो वास्तुकश्चक्रवास्तुकः ।
अनन्ता दीर्घमूला च समुद्रान्ता यवासकः[८] ॥ ५९ ॥
विष्णुक्रान्ता नीलपुष्पी सतीनच्छदना स्मृता ।
वत्सादनी सुदर्शाख्या चक्राङ्गी दृढवल्लिका[९] ॥ ६० ॥
जीवन्तिका रक्तनाला चिल्लिका[१०] रोमशा च सा ।
मधुयोनिः स्वादुरसा चोत्तरापथिका स्मृता[११] ॥ ६१ ॥
कशेरुकं कपित्थं च सुपुष्पो मधुरश्च सः ।

---

१. verses 52 and 53 are absent in Mss 1–2

२. सहदेवी३

३. रक्तबिन्दुचरा३

४. वारुण्याच्छादनफला३

५. वाल्या१

६. अगस्तिको३

७. मौनी नामा३

८. यवानिकः१

९. कार्श्यकश्च सा३

१०. छिल्लिका३

११. Absent in mss. 2–3

सर्पच्छत्रो भूकवचो भूस्फोटो भूमिकन्दकः ॥ ६२ ॥
श्रृंगाटकस्त्रिश्रृंगश्च जलबिन्दुस्त्रिकण्टकः ।
स्थौणेयकं बर्हिचूडं[1] चारटी तैलपीतकम् ॥ ६३ ॥
कोशोत्पलं शीर्णरोमा धूमसाह्वः शुकच्छदः[2] ।
कूष्माण्डकी पुष्पलता ककुभाण्डो महाफलः[3] ॥ ६४ ॥
त्रपुसं मूत्रलं चैव गजदन्तफलं च तत् ।
कर्क्कारुकी राजपुत्री रोमशा व्यालपुत्रिका ॥ ६५ ॥
कलिङ्गोर्वारुकं [4]पाण्डुपत्रच्छत्रारुणो[5] च सा ।
अलाबुः स्यात्पिण्डफला तुम्बी पुष्पफला च सा ॥ ६६ ॥
धामार्गवः कोशफलो राजकोशातकी तथा ।
कर्कोटकी[6] पीतपुष्पी महाजाली निरुच्यते ॥ ६७ ॥
सिक्थकं[7] तु मधूच्छिष्टं विकसं मक्षिकामलम् ।
जाम्बूनदं जातरूपं हिरण्यं हेम हाटकम् ॥ ६८ ॥
चामीकरं चारुपुष्पं सुवर्णं स्वर्णकाञ्चनम् ।
तपनीयं शातकुम्भं रुक्मं कनकमेव च[8] ॥ ६९ ॥
सुगन्धप्रसवः शालिः रक्तशालिरुदाहृतः ।
अकृष्टपाकी नीवारः शकुन्त ऋषिभोजनम् ॥ ७० ॥
प्रियंगुः कंगुकः[9] सारः कंगुकः[10] पीततण्डुलः ।

---

१. वह्निचूर्णा३　　　　२. सक्तच्छदः२ शुकश्च सा३
३. इसके पहले पां० २ में—"स्थोणेयकं बर्हिचूडं शुकपिछ शुकदमम् ।
विकसं शुकबर्हं च सारणि शीर्णरोमकम् ॥"
४. भाण्डपत्री१　　　　५. च्छत्रफली१
६. कर्कारुकी१,२　　　　७. स्निग्धकं१,२
८. इसके बाद पां० ३ में—"महारजतमं सर्पयुतं गांगेयं भर्मकर्बुरम्"
९. प्रियंगुकश्च कासारः३　　　　१०. कर्णकः१ प्रियंगु२

श्यामाकस्तृणबीजः[1] स्यात् मुनिभक्षो गजप्रियः ॥ ७१ ॥
कोरदूषो महारूक्षो वरकः कोद्रवश्च सः ।
जूर्णस्तु यावनालः स्याद्दुद्दालो मारुतश्च सः ॥ ७२ ॥
वृष्यश्च गोधूमः सस्वागामिको म्लेच्छभोजनम् ।
स्थूलमध्यो[2] यवः प्रोक्तः स्थूलमज्ञासिपत्रकः ॥ ७३ ॥
मुद्गा मसूरा हरिताः[3] शारदा हरिमस्तकाः ।
बासन्ताः कृष्णमुद्गाः स्युः धान्यमाषकस्तु माषकः[4] ॥ ७४ ॥
हरेणवः सतीनाः स्युश्चणकस्त्रिपुटो मतः ।
कुलुत्थः कालवृन्तः स्यात्[5] निष्पावः श्वेतबिन्दुकः ॥ ७५ ॥
राजमाषोऽलसान्द्रः स्यात्[6] आढकी तुवरी मता ।
चक्षुष्योऽरण्यकौलुत्थः लंकाख्यस्तु कलायकः ।
तिलः स्नेहफलः स्नेहपूरकः फलकस्तथा[7] ॥ ७६ ॥

॥ इत्यभिधानरत्नमालायां प्रथमः स्वादुस्कन्धः[8] ॥

---

१. तृणबन्धुः३ तृणबिन्दु२ २. स्थूलमज्जो२

३. मुद्गा मसूरा विदला२ ४. सूपकः पित्तनाशनः१,२

५. After This the following line is found in Mss. 1–2
'निष्पावः श्वेतबिन्दुश्च बिन्दुकः रक्तशीलकः',

६. After this Mss. 1–2 Contain—
'रक्तको दीर्घकाफलः । आढकी तुवरी मता ।'

७. फलकः स्मृतः३ ८. इत्यभिधानरत्नमालायां स्वादुस्कन्धः१,२

२. अथाम्लद्रव्यस्कन्धः

तक्र[1]भेददधिस्तुकांजिका,
ज्येष्ठवारिमदिराकिणालयाः ।
अम्लवेतसकुशाम्लतिंतिणी,
दाडिमामलकरक्तपूरकाः ॥ १ ॥
आम्रपीतनकपित्थचुक्रिका,
साम्लपुष्पकरमर्दकाम्लिका ।
भव्यकोलफलपूरजम्बलै—
रावतैः सह मुखप्रियायसे ॥ २ ॥
वर्तलौह[2]मलकिट्ट इत्यपि,
स्कन्ध एषः कथितोऽम्लवस्तुभिः ॥

तक्रं तु गोरसं घोलं तद्भेदाः कालशेयकम् ।
सान्द्रदण्डाहतोदस्विन्मथितं च प्रकीर्तितम् ॥ ३ ॥
माङ्गल्यं[3] [4]दधि तन्मण्डो[5] मस्तु दध्युत्तरश्च सः ।
अवन्तिसोमः सौवीरं शुक्लसारं तु कांजिकम् ॥ ४ ॥
धान्याम्लमारनालं च मूर्च्छाभेदी महारसः ।
शुक्तं सहस्रभेदश्च रसाम्लं शुक्लमेव च ॥ ५ ॥
ज्येष्ठाम्भस्तुषसम्भूतं तण्डुलोत्थं तुषोदकम् ।
कादम्बरी[6] तु मदिरा प्रसन्ना वारुणी सुरा ॥ ६ ॥

---

१. आम्ल १ — २ मधुकिट्ट ३
३. क्षीरजं दधि माङ्गल्यम् ३ — ४. दधिकं चैव १
५. तन्मन्दो मस्तुकश्च सः १ — ६. कादम्बरीषत्कापीशायिनी २

मद्यं महोदधिसुता वारि स्यात् कापिशायनी[1] ।
किण्वं रसायनं भद्रं सुरावर्ति[2] किणालयम् ॥ ७ ॥
सहस्रवीर्यं वराम्लं रक्तस्रावो[3]ऽम्लवेतसम् ।
क्षुद्राम्लकस्तु कोशाम्लो[4] लाक्षावृक्षः सरक्तकः ॥ ८ ॥
जन्तुवृक्षो घनस्कन्धः कुशवृक्षः[5] कुशाम्लकः ।
वृक्षाम्लं तिंतिणी चिंचा चुक्रिका[6] तिंतिणीफला ॥ ९ ॥
बहुपुत्रा[7] घनच्छाया कुशाम्लोऽम्लदलश्च सः ।
शुकेष्टो दाडिमो रक्तबीजस्तु फलषाडवः ॥ १० ॥
मधुराम्लफलो रक्तकुसुमो[8] रक्तपूरकः[9] ।
धात्र्यामलकी कोरङ्गा वयःस्था चामृता शिवा ॥ १० ॥
कुपाण्डको[10]ऽमृतफला वृष्या तिष्यफला च सा ।
चिंचाम्लिका तिंतिणिका जीवन्ती रक्तपूरकः ॥ ११ ॥
आम्रश्चूतः[11] श्यावतैलः कान्तपिण्डफलश्च[12] सः ।
रसालः सहकारश्च फलपुष्पमहोत्सवः ॥ १२ ॥
आम्रातकोः[13]ऽम्लपाटकः कपिचूतोऽम्लपादपः[14] ।
स्निग्धवृक्षस्तनुक्षीरः टंकस्स्याद् गूढबीजकः ॥ १३ ॥
कपित्थस्तु दधिच्छत्रो दधित्थः सुरभिच्छदः ।
मूषकघ्नो दृढफलो[15] ग्राही फलसुगन्धिकः ॥ १४ ॥

---

१. परिशुष्क पिपासिनी१
२. सुरावर्त्त ३
३. रक्तसारा३
४. कोशाम्रो३
५. शुक्लवृक्षः१
६. शुक्लिका१,३
७. बहुपत्रा३
८. रक्तबीजको३
९ बीजपूरकः१
१०. कुपाण्ड्वकस्ताम्रफला१
११. तथा२
१२. आम्लातकः१,१
१३. पीतरक्तः२
१४. पंकः स्यात्३
१५. दधिफलो२

चुक्रिका[1] त्वम्लचाङ्गेरी सुनिषण्णा सुपत्रिका ।
करमर्दी क्षीरफला साम्लपुष्पफला च सा[2] ॥ १५ ॥
कृष्णपाकफलाविग्ना[3] करमर्द्दः कराम्लिका ।
गोधा[4] वन्या भ्रमणिकाम्लिका कट्वंगनामिका[5] ॥ १६ ॥
कशेरुकं भवं[6] भव्यं करवीरारुकारुकम्[7] ।
कोलं[8] बदरी सिञ्चन्ती[9] कर्कन्धुर्युगकण्टकः ॥ १७ ॥
मातुलुङ्गो बीजपूरः[10] केसरी फलपूरकः[11] ।
केसराम्लः सुपूरश्च लुङ्गी बीजाह्वयद्रुमः[12] ॥ १८ ॥
स्युर्जम्बीरे दन्तशठजम्बुजम्बीरजम्बलाः[13] ।
पारावतं[14] तु रुद्राक्षमैरावतमुदीतिम्[15] ॥ १९ ॥
नारंगस्तु सुगन्धः स्याच्चक्रवाको[16] मुखप्रियः ।
कृष्णलोहमयस्सारमायसं[17] च शिलोद्भवम् ॥ २० ॥
वर्तलोहं त्रिलोहं च पञ्चलोहं च नायकम् ।
मण्डूरं गिरिजं किट्टं कृष्णलोहमयं च तत् ॥ २१ ॥

॥ इत्यभिधानरत्नमालायां द्वितीयोऽम्लस्कन्धः[18] ॥

---

१. शुक्लिका १ २. तथा २
३. वन्ध्या २ ४. गोदा वल्ली ३
५. भ्रमरिका २ ६. कपित्थं च ३
७. सुपुष्पी मधुरा च सा ३ करवीरारुणं कुकम् १ ।
८. कोला ३ ९. चण्डी ३
१०. बीजसारः १ ११. देववल्लभः २
१२. इसके बाद पां० ३ में :—"लकुचो लिकुचो निम्बोऽहुर्जम्बीरनामकः २"
१३. "जम्भजम्भीरजम्भला" ३ १४. पारेवतं ३
१५. पारावतन्तुकं द्राक्षा १ १६. चक्रवाकमुखप्रियः २०
१७. मलस्सार १
१८. इत्यभिधानरत्नमालामां द्वितीयः स्कन्धः १,२

३. अथ लवणद्रव्यस्कन्धः

सैन्धवरुचकविडाख्यं पांशुजमप्यौद्भिदञ्च सामुद्रम् ।
क्षारत्रयं ससीसं त्रपुसञ्च स्कन्ध एष लवणाख्यः ॥ १ ॥
सिन्धु सैन्धवनादेयं मणिबन्धं पटूत्तमम् ।
सौवर्चलं सुगन्धं[1] च रुचकं कृष्णनामकम् ॥ २ ॥
सुपाक्यं खण्डलवणं कृतकं[2] कृत्रिमं विडम् ।
ऊषक्षारं तुषक्षारं[3] पांशुजं पाक्यमूषकम्[4] ॥ ३ ॥
औद्भिदं क्षितिसंभूतं रोमकं[5] तोयपाकजम् ।
समुद्रजं तु सामुद्रं लवणं सिन्धुसम्भवम्[6] ॥ ४ ॥
यवशूको यवक्षारो यवाह्वो यवभस्मजः ।
अन्यत् सौवर्चलक्षारं स्रोतोघ्नी[7] स्वर्चिका[8] तथा ॥ ५ ॥
सौभाग्यं टंकणक्षारो मालतीतिलसम्भवम्[9] ।
योगेष्टं कृष्णकांबोजं[10] सीसकं नागसंज्ञकम् ॥ ६ ॥
तगरं त्रपुसं वङ्गं रूप्यकं तु गुरु त्रपु ।

॥ इत्यभिधानरत्नमालायां तृतीयो लवणस्कन्धः[11] ॥

---

१. सुवर्चं च २
२. क्लीतकं ३
३. उपाक्षारं ३
४. ऊषजम् २ ऊसरम् ३
५. रोमशं २
६. सामान्यं लवणं पटु is after this in mss. 1–2
७. स्रोतोऽग्नि १,२
८. सज्जिका ३
९. मालतीतैलसम्भवम् २
१०. कृष्णकं बीजं १,२ कुष्टकं बीज ३
११. इत्यभिधानरत्नमालायां तृतीयस्कन्धः १,२

४. अथ तिक्तद्रव्यस्कन्धः

वासाकुष्ठपटोलपर्पटविषापाठामृतारोहिणी,
गायत्रीखदिराभयाम्बुकटुकामूर्वानिशामोरटा ।
भूनिम्बारलुनिम्बपुष्करजयाक्षुद्राग्निमन्थस्नुही,
शृंगीपाटलिकाश्मरीधनं[२]दद्दक्श्योनाकभार्ङ्गीफलम्[४] ॥ १ ॥
लम्बाजीमूतबिम्बीशणकुटजधनीजालिनीशक्रवारु-
ण्येरण्डारग्वधोग्रासहचरसुवहात्रायमाणाजशृंग्यः ।
चाण्डालीसोमराजीदवनमरुबकंकुष्ठमण्डूकपर्णी,
ब्राह्मीपार्थाप्रियंगुभ्रमरलवणिकादुग्र्हाः   कर्णिकारः ॥ २ ॥

[५]पैत्तंगकालेयकगन्धसार—
काश्मीरकर्पूरजटातुरुष्काः ।
गोरोचनाजोङ्गकनन्दिवृक्ष—
[६]स्पृक्काग्रजातीरसपूतिकाष्ठाः[७] ॥ ३ ॥
शैलेयगुग्गुलुशिलाजतुवृश्चिकाली
कंपिल्लकं शिखरिकः कतकं विशल्या ।
धूर्त्तैलवालुकरवीरककाकमाची,
गुञ्जाज्झटाश्वखुरकिंशुकसप्तपर्णाः ॥ ४ ॥
घोण्टा हिंस्रा सौकरी हंसपादी,
जाती मुष्कःसिन्धुवारः करञ्जौ ।

---

१. कुधरा ३,२ २. मन्थस्नुही३
३. भज्जिफलम्२ ४. धनदद्रु३
५. पत्राङ्ग२ ६. स्पृग्वङ्ग३
७. यहाँ से ३ श्लोक पां० २ में नहीं हैं ।

शार्ङ्गेष्टोमा तुम्बुरुश्चमरङ्गा,
मज्जा वेत्रं शंखिनी जिंगिणी च ॥ ५ ॥
आदार्योरामशीता[1]क्षवकझरसिकाकाकजंघेषुपुंखी ।
बस्तान्त्रीपत्रभंगाकटभिकिणिहिसो[2]पानहा सारणी च ॥
रोहीतः सूक्ष्मनालो वटदलकटभी[3]वार्य[4]सीकारवल्ली ।
रामा पञ्चाङ्गुलीका युग[5]फलशिख[6]रीकांस्यकं तिक्तवर्गः ॥६॥
वासा वृषा सिंहमुखी भिषङ्माताऽऽटरूषकः[7] ।
दुर्नामा वालुकं कुष्ठं पारिभाव्यं तदुत्पलम् ॥ ७ ॥
पटोलः कुलकः पाण्डुः राजमाताऽमृताफला[8] ।
शीतप्रियः पर्पटकस्तृष्णाघ्नः सूक्ष्मपत्रकः ॥ ८ ॥
वनतिक्तो रेणुनामा कवचो रेणुकण्टकः ।
भंगुराऽतिविषा शृंगी शुक्लकन्दा घुणप्रिया ॥ ९ ॥
द्वितीया प्र[9]त्युपविषा श्वेतरक्तविषाऽविषा ।
मालवी त्रिशिरा पाठा प्राचीना वृत्तपर्णिका[10] ॥ १० ॥
अम्बष्ठा स्थापनी वीरा बोधनी[11] चक्रचेलिका[12] ।
वयःस्था[13] कुण्डली छिन्नरुहाऽमृतलताऽमृता ॥ ११ ॥
मधुपर्णी सोमवल्ली गुडूची[15] देवनिर्मिता ।
वत्सादनी काण्डजाता[16] तन्त्रिका चक्रलक्षणा ॥ १२ ॥

---

१. क्षवक२
२. चोपानहत्३
३. कटभी३
४. पानशी१
५. युग्मफला३
६. शिखरिकः३
७. टरुषिणी२ परुषकः१
८. पटुः३
९. निर्विषा२
१०. वृद्धपर्णिका१ विद्धकर्णिका३ वृन्तपर्णिका२
११. बोधकी३
१२. श्रेयसी शिवा३
१३. पयस्या १
१४. चिह्ना १,२
१५. गुलूची १,२
१६. काण्डयुता२

श्वेतसारो महावल्को रोहिणी सोमवल्कलः ।
गायत्री कण्टकी गीतिः खदिरो दन्तधावनः ॥ १३ ॥
कुष्ठघ्नो बालपत्रश्च कषायफलपुष्पकः ।
कदरः[1] खदिरस्सारः[2] कोटरी श्यामसारकः ॥ १४ ॥
वीरणा[3]भयलामज्जसेव्योशीरमृणालकम् ।
वीरं वीरणमूलञ्च बहुमूलं रणप्रियम्[4] ॥ १५ ॥
ह्रीबेरं बालकेशाह्वमुदीच्यं बाल[5]कञ्जलम् ।
तिक्ता कटूवी[6] मत्स्यविन्ना कटुका शकुलादनी ॥ १६ ॥
शतपर्वा कृष्णभेदा[7] त्वरिष्टा[8] कटुरोहिणी ।
मूर्वा मधुरसा देवी फलश्रेणी[9] मधुस्रवा ॥ १७ ॥
हरिद्रा हलदी[10] पीता पिण्डा गौरी निशाह्वया ।
वर्णिनी[11] रजनी[12] दीर्घरागा रोमशवर्ष्मका[13] ॥ १८ ॥
दार्वी पचंपचा पीतदारु दारुनिशाभिधा ।
कटंकटेरी पर्जन्या कालेयककुसुम्भकौ[14] ॥ १९ ॥
पीलुपर्णी मुरङ्गी[15] च मोरटी क्षीरमोरटा ।
किराततिक्तो भूनिम्बः कैरातः काण्डतिक्तकः ॥ २० ॥
महानिम्बोऽरलुः दीर्घवृन्तः कटूवङ्ग[16] उच्यते ।
निम्बस्तु हिंगुनिर्यासः प्रभद्रो यवनप्रियः ॥ २१ ॥

---

१. खुदरः२ कुदरः१ — २. रूक्षो१
३. हिरण्यं १ वैरण्या ३ — ४. वनप्रियम् ३
६. बालुकं १,२ — ५. स्वाद्वी२
७. कृष्णफला२ — ८. सारेष्टा २,३
९. मधुश्रेणी३ — १०. हरिता१
११. फणिप२ पर्णिनी३ — १२. रंजनी२
१३. रोमशपर्णिका३, रोमशमूलिका१ — १४. कुसुम्भला १,२
१५. मोरङ्गी च३ — १६. खट्वाङ्गः १,२

अरिष्टः सर्वतोभद्रः पिचुमन्दः शुकप्रियः[1] ।
मूलं तु पौष्करं शूलनाशनं[2] पुष्कराह्वयम् ॥ २२ ॥
अग्निमन्थो वैजयन्ती तर्कारी विजया जया ।
क्षुद्राग्निमन्थोऽरणिका गन्धपत्रो वरो मतः ॥ २३ ॥
वज्रतुण्डो महावृक्षो गण्डीरस्स्नुक् सुधा स्नुही ।
समन्तदुग्धा सिंहुण्डो[3] वज्रो यमलकण्टकः ॥ २४ ॥
दलस्नुही[4] श्वानजिह्वा पत्रस्नुक् सुविरेचनी[5] ।
महाघोषा कुलिंगा[6] च भृङ्गी कर्कटश्रृंगिका ॥ २५ ॥
अमोघा पाटली स्थाली कालवृन्ता च कुम्भिका ।
वसन्तदूतिका ताम्रपुष्पी तोयाधिवासिनी ॥ २६ ॥
काश्मर्यभीरुः[7] श्रीपर्णी काश्मीरी कट्फलं तथा ।
कृष्णवृन्ता महाकुम्भा गम्भारी सर्वभद्रिका ॥ २७ ॥
कालवृन्ता[8] कुबेराक्षी कुञ्जराक्षी[9] च यक्षदृक् ।
भल्लूकस्तुण्डिको भूतवृक्षः श्योनाकजम्बुकौ ॥ २८ ॥
भार्ङ्गी[10] गर्दभशाकं च पद्मा[11] ब्राह्मणयष्टिका ।
भञ्जी बर्बरकोऽङ्गारवल्ली स्याच्चारुपर्वणी[12] ॥ २९ ॥
मदनः शल्यको रालः[13] पिण्डीतकरहाटकौ[14] ।
वमनो[15] गालवो गालश्च्छर्दनः श्वसनः फलम् ॥ ३० ॥

---

१. सतिक्तकः २
२. रोमनामकं २,३
३. सैमुण्डी१
४. नलस्नुही१
५. मृदुरेचनी १,२
६. कलिंगा च ३;
७. वीरा २
८. कालपुत्री १
९. कुलिङ्गाक्षी १
१०. भार्जि२
११. ब्रह्मी २
१२. ब्राह्मी सुगन्धिका ३
१३. रागः३
१४. करिमारकः१
१५. मरुबो३

लम्बा पिण्डफलेक्ष्वाकुः कटुकालाबु तुम्बिका ।
गर्दभाञ्जलिका वेणी जीमूतो देवदालिका[१] ॥ ३१ ॥
दधिपुष्पा च कर्कोटी मूषिकाविषनाशनी ।
बिम्बी रक्तफला तुण्डी तिक्ता कीरफला[२] स्मृता ॥ ३२ ॥
ओष्ठोपमफला दीर्घप्रवाला तुण्डिकेरिका ।
शणघण्टा बृहत्पुष्पी शणपुष्पी शणः शणी ॥ ३३ ॥
कुटजो मल्लिकापुष्पो गिरिजो गिरिमल्लिका ।
वृक्षकः शक्रवृक्षश्च[३] वत्सको[४] वनतिक्तकः ॥ ३४ ॥
तद्बीजानीन्द्रभद्रानुयवास्ते स्युः कलिङ्गकाः[५] ।
कुस्तुम्बुरु धनं धान्यं वितुन्नं धान्यकं धनी ॥ ३५ ॥
कटुकोशातकी[६] क्ष्वेला जालिनी कृतवेधना ।
गवादनी[७] मृगोर्वारु[८] गवाक्षी गजचिर्भिटा[९] ॥ ३६ ॥
विशाला च विशल्या च वारुणी शक्रवारुणी[१०] ।
आमण्डरण्डकैरण्डश्चित्रो गन्धर्वहस्तकः ॥ ३७ ॥
पञ्चांगुलो वर्धमानो वातघ्नोत्तानपत्रकः ।
रक्तस्तु गजकर्णाख्यो व्याघ्रो व्याघ्रतलोपमः ॥ ३८ ॥
आरग्वधो राजवृक्षः शम्याकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः प्रग्रहः कृतमालकः[११] ॥ ३९ ॥
कोशोपमफलो[१२] दीर्घफलो रैवतकश्च सः ।

---

१. देवताड़िका३ २. तुण्डी २, तुण्डिकेर३
३. वत्सकः शक्रवृक्षश्च३, चक्रवृक्षः१,२ ४. क्षवको३
५. "तद्बीजेन्द्रयवं भद्रयवं तस्मिन् कलिंगकः३ ।
६. तिक्तकोशातकी१ ७. देवादनी३
८. मरुवोर्वारु३ ९. गजविद्विषः३
१०. चक्रवारुणी१ ११. कृतमारकः२
१२. कालोपमफलो१

वचोग्रगन्धा षड्ग्रन्था जटिला लोमशा वचा[1] ॥ ४० ॥
गोलोम्युग्रा च शुभ्रा तु हैमवत्युत्तरापथी[2] ।
पीतः कुरण्टको नीलो बाणः कुरुबकोऽरुणः ॥ ४१ ॥
सैरेयकः सहचरः सैर्यको मृदुकण्टक[3]: ।
आम्लायनो[4] नीलराजिः सैर्यकः केशरञ्जनः[5] ॥ ४२ ॥
सुगन्धा सुवहा रास्ना नाकुली गन्धनाकुली[6] ।
सुगन्धमूला युक्ताह्वा सैव[7] वृक्षरुहा[8] स्मृता ॥ ४३ ॥
त्रायमाणा कृतत्राणा पालिन्दी[9] भयनाशनी ।
अजशृंगी विषा काली चक्षुष्या बहुशृंगिका ॥ ४४ ॥
वर्तिका दक्षिणावर्ता तिक्तगन्धा विषाणिका ।
नीलपत्रा वेणिनीली[10] नीलन्दी नीलयष्टिका ॥ ४५ ॥
चण्डालिका वृषा काली विषघ्नी च विशोधनी[11] ।
अवल्गुजश्चन्द्ररेखा मलयू[12]: सोमराजिका ॥ ४६ ॥
पूतिकृष्णफला सोमवल्लिका वाकुची च सा ।
ऋषिर्दमनको[13] दान्तो[14] वनजः[15] पाण्डुरागकः[16] ॥ ४७ ॥
खरपत्रा[17] खरबुसा ग्रन्थिको[18] मरुबो मरुः ।
कंकुष्ठो रेचनी स्वर्णक्षीरिणी तिक्तदुग्धिका ॥ ४८ ॥

---

१. च सा ३
२. हेमवत्युत्तरापदम् १
३. मृदुपुष्पकः २
४. आम्नायको ३
५. नखरंजनः ३
६. गन्धसाकुली १
७. स्थैर्य्य २
८. युक्तरसा ३
९. पालिटा १
१०. खरानीली ३ कलीनीली १
११. विषाणिका १
१२. मलया ३
१३. रुचिरदमनको २
१४. दन्तः १,३
१५. विनीतः ३
१६. पाण्डुरोगकः २,३
१७. बहुपुत्रः २
१८. गन्धिनो २

काककुष्ठा[१] कृष्णगन्धा क्षीरिणी पीतपुष्पिका ।
मण्डूकपर्णी विक्रान्ता दीर्घतेजा वरौषधिः[२] ॥ ४९ ॥
ब्राह्मी चर्मकषा फेना सातला[३] सप्तला च सा ।
कपोतवङ्का पार्था च रविभक्ता सुवर्चला ॥ ५० ॥
सूर्यानुवर्तिनी सूर्यकान्ता ब्रह्मसुवर्चला ।
प्रियंगुः फलिनी श्यामा कान्ता[४] गोविन्दिनी प्रिया ॥ ५१ ॥
मार्कवो भृंगराजश्च[५] राजमेषविलोचना ।
अंगारको महानीलो भृंगाख्यः केशरञ्जनः ॥ ५२ ॥
ज्योतिष्मती स्वर्णलता ज्योतिष्काह्वा च दुर्मदा[६] ।
लवणी[७] कंगुनी पीता पीततैला मतिप्रिया[८] ॥ ५३ ॥
अपामार्गस्तु[९] शिखरी प्रत्यक्पुष्पी मयूरकः ।
अधश्शल्यः[१०] शैखरिको दुर्ग्रहः खरमंजरी ॥ ५४ ॥
कर्णिकारः कच्छुदारः[११] कोकः कनकपुष्पकः ।
पीतपुष्पः किंकिरातः पीतभद्रो मृदुद्रुमः ॥ ५५ ॥
कुचन्दनं रक्तकाष्ठं पत्रांगः[१२] क्षुद्रचन्दनम्[१३] ।
कालेयकं पीतसारं तत्तु स्यात्पीतचन्दनम्[१४] ॥ ५६ ॥
भद्रश्रियं मलयजं गोशीर्षं श्वेतचन्दनम् ।
श्रीगन्धं शिशिरं गन्धसारं तत्तैलपर्णिकम्[१५] ॥ ५७ ॥

---

१. काककृष्णा३
२. वनौषधिः३
३. पाताला२
४. लता३
५. स्याद्राजा३
६. ज्योतिष्मधृतदुर्मला३
७. लवणिकं२
८. पीततैलौषधप्रिया३
९. अपामार्गःशैखरिको२
१०. धामार्गवः३
११. कंचुदारः१
१२. पत्तुंगः१,३
१३. रक्तचन्दनम्२
१४. पित्तकारकम्२; यह श्लोक पां० ३ में नहीं है ।
१५. तैलसुवर्णकम्२ ।

द्वितीयं रक्तसारञ्च लोहितं हरिचन्दनम् ।
काश्मीरं कुंकुमं रक्तं बाह्लीकं रुधिराह्वयम् ॥ ५८ ॥
पीतकं पुष्पराजं[1] च मसृणं घुसृणं च तत् ।
घनसारस्तु कर्पूरं चन्द्राह्वं[2] हिमबालुकम् ॥ ५९ ॥
पिशाची नलदं मांसी जटिला भूतकेशिका[3] ।
भूता भूतजटा केशी रोमशा पूतना जटा ॥ ६० ॥
तुरुष्को यवनः पिण्डः पिण्याकः कृत्रिमः[4] कपिः ।
तुरुष्करो धूमपर्ण[5]श्चलो युक्तः सुगन्धिकः ॥ ६१ ॥
गोरोचना रोचना च गौरी पिण्डा च गोमती ।
अगरुः शीतशमनो[6] जोङ्गकः कृष्णशीर्षकः ॥ ६२ ॥
कृष्णागरुर्लोहनामा जन्तुजग्धो[7] वरद्रुमः[8] ।
नन्दिवृक्षः प्ररोहो स्यात् स क्षीरी[9] च जयद्रुमः[10] ॥ ६३ ॥
स्पृक्का स्पृग् ब्राह्मणी देवी पिशुना च लता सती ।
बर्हिष्ठं तगरं वक्त्रं नतं कालानुसार्यकम् ॥ ६४ ॥
जातीरसस्तु निर्यूहो बोलो गन्धरसो रसः ।
सरलं पूतिकाष्ठञ्च कर्णकः[11] स्नेहदारुकः[12] ॥ ६५ ॥
मुखलेपो दीर्घवृक्षः पीतद्रुः[13] स्थूलकण्टकः[14] ।
शिलापुष्पं तु शैलेयं शिलाजं स्थविरं ध्रुवम्[15] ॥ ६६ ॥

---

१. पुष्पसारं२
२ सिताभ्रो१
३. भूतकेशिनी२
४. कुक्रमः३
५. धूम्रपर्ण; २,३
६. शीतमानोऽपि१
७. जन्तुदुग्धो३
८. वनद्रुमः३
९. सृष्टक्षीरो ३ त्वक्षीरो२
१०. तृणद्रुमः१ जलद्रुमः२
११. सुवर्ण३, वर्णकः२
१२. देवदारुकम्३
१३. पीतदृक्१
१४. यह पंक्ति पा० ३ में नहीं है।
१५. तथा२,३

महिषाक्षो निशाचारी कौशिको गुग्गुलुः पुरः ।
जटायुः कालनिर्यासो[1] दुर्गनामा पलङ्कषा ॥ ६७ ॥
गिरिजं शैलनिर्यासमश्मजञ्च[2] शिलाजतु ।
पार्वतं धातुजं चैव योगवाहि रसायनम् ॥ ६८ ॥
नक्राहिदंष्ट्रिका[3] कोली वृश्चिकाल्युष्ट्रधूमिका[4] ।
धूमपत्रा विशल्या[5] च विषघ्नी सर्पदंष्ट्रिका ॥ ६९ ॥
कम्पिल्लको रञ्जनको रेचको रक्तपूरकः ।
अर्काह्वयः शुकफलः[6] सदापुष्पी च धूपिका[7] ॥ ७० ॥
क्षीरिण्यास्फोटकोऽन्यस्तु राजार्कः शिवमल्लिका ।
वसुकालर्कमन्दारा एकाष्ठीलो विकीरणः ॥ ७१ ॥
चक्षुष्यः कतकः कान्तः कट्फलोऽम्बुप्रसादनः[8] ।
लांगल्यग्निमुखी दीप्ता फलिन्यर्धेन्दुपुष्पिका[9] ॥ ७२ ॥
उन्मत्तो मातुलो धूर्त्तो धत्तूरः काञ्चनाह्वयः[10] ।
त्रिपुष्पी मोहिनी दुद्धी[11] मदनी[12] कृष्णपुष्पिका ॥ ७३ ॥
गान्धारी[13] विजया भङ्गी भृङ्गी चाञ्जनपत्रिका[14] ।
एलवालुकमैलेयं शैलेयं गिरि[15]वालुकम् ॥ ७४ ॥
उर्वारुकं वालुकञ्च तिक्तमुर्वारुकञ्च तत्[16] ।
करवीरोऽश्वहा वीरो दीर्घपत्रो हयद्रुमः[17] ॥ ७५ ॥

---

१. कोलनिर्यासो१ २. मन्दरोब्दं१
३. नक्रोऽहिदंष्ट्रः३ ४. वृश्चिकव्यालधूलिका३
५. विकारेष्टा१ विशल्योष्ट्रा१ ६. शिखरिको३
७. भूमिका३ ८. कुड्मलो३, कृतफलो१, कट्ठला२
९. यह पंक्ति पां० २ में नहीं है। १०. कनकाह्वयः३
११. पुष्पी३ १२. मोहिनी१,३
१३. गंजायि३ १४. यह पंक्ति पां० ३ में नहीं है।
१५. हरि२ १६. यह पं० पा० १,२ में नहीं है।
१७. अश्वमारकः२, विषद्रुमः३

काकमाची गुडफला सर्पमारी च काकला।
चूडामणिः शीतपाकी ताम्रिका[1] कृष्णरक्तिका ॥ ७६ ॥
उज्झटा[2] फलशीर्षाह्वा गुञ्जा सा काकचिञ्चिका[3]।
श्वेतकाम्भोजिका ध्वांक्षा श्वेतपाकी शिखण्डिका[4] ॥ ७७ ॥
तृतीया कृष्णकाम्भोजी कृष्णपाकी च नीलिनी।
अज्झटा बहुपुत्रा च भूधात्री तामलक्यपि ॥ ७८ ॥
वितुन्नकं चामलकं कुलटा[5] सामलोकिनी[6]।
गिरिकर्ण्यश्वखुरिका स्थाणुपर्णी[7] गवादनी ॥ ७९ ॥
धेनुश्रेणी[8] गवाक्षी सा श्वेतस्यन्दा[9] च शूर्पिका।
नीलस्यन्दा नलश्रेणी[10] नीला च गिरिकर्णिका ॥ ८० ॥
नीलिनी चारटी नीलपुष्पिका नीलिनी[11] तथा।
पलाशः किंशुकः क्षारश्रेष्ठो ब्रह्मतरुर्वट्टुः[12] ॥ ८१ ॥
बीजस्नेहो रक्तपुष्पः कृमिघ्नश्च समित्तरुः[13]।
सप्तच्छदो युग्मपत्रः[14] सप्तांगो गुच्छपुष्पकः[15] ॥ ८२ ॥
गुच्छपत्रो[16] बृहत्पत्रः सुवर्णः शाल्मलच्छदः।
बदरी कण्टकी घोण्टा गोपघोण्टा[17] घुटा च सा ॥ ८३ ॥

---

१. रक्तफला२
२. सितिका३
३. पिच्छिलो२
४. काकनाहिका१, कारनंदिकः३
५. शिखण्डनी३
६. कुनटी२
७. चामला शिवा३
८. कर्णी३
९. धनश्रेणी३
१०. श्वेतचन्दन३
११. व्यक्तगन्धिका
१२. कट्टुः३ पटी३
१३. शमीतरुः३
१४. युग्मपर्णः२,३
१५. गुच्छपुष्पिका१
१६. "सप्तपर्णो विशालत्वक् शारदो विषमच्छदः२" ॥
१७. गोपी घोण्टा३

कुण्डली विरला हिंस्रा दुर्धर्षा वक्रशल्यका[1] ।
काकादनी गृध्रनखी तथा गृध्रफला[2] च सा ॥ ८४ ॥
वाराही सौकरी वृष्या भृङ्गिनी वनमालिका ।
हिरण्यपुष्पी खर्जूरी तालपत्री च मौशली ॥ ८५ ॥
हंसपादी रक्तपादी त्रिपादी कीटमारिका[3] ।
धृतराष्ट्रपदी चैव धृतगन्धा त्रिपत्रिका[4] ॥ ८६ ॥
जाती मनोज्ञा सुमना मालती च प्रियंवदा ।
मोक्षकः शिखरी मुष्कः क्षाराग्रचः[5] कालमुष्ककः[6] ॥ ८७ ॥
भूतावेशी शीतसहो निर्गुण्डी भूतकेशिका ।
श्वेतपुष्पी सिन्धुवारः प्रोक्ता शेफालिका चसा ॥ ८८ ॥
करञ्जो मञ्जरीपुष्पो नक्तमालो दकीर्यकः[7] ।
छायाप्रियो लाजपुष्पो[8] मातृनन्दनकश्च सः ॥ ८९ ॥
पूतिकरञ्जः पूतीकश्चिरबिल्वः प्रकीर्यकः[9] ।
उत्तुण्डिका काकतुण्डी शार्ङ्गेष्टाङ्गारवल्लिका[10] ॥ ९० ॥
काकतिक्ता काकभञ्जी वायसी मार्कवल्ल्यपि ।
उमातसी नीलपुष्पी लालसी[11] रुद्रपर्णिका[12] ॥ ९१ ॥
तुम्बुरुः सारजः सारो वनजः सानुजोऽनुजः ।
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो[13] महामुनिः[14] ॥ ९२ ॥

---

१. वक्रकण्टकः१ काकशीर्षका३ — २. गृध्रहरा१
३. कीटमालिका३ — ४. मृतगंधा सुपत्रिका२
५. क्षारायुः३ — ६. क्षारमुष्ककः३
७. प्रकीर्यकः२ — ८ वाजपुष्पो२
९. प्रकीर्तितः१ — १०. वल्ल्यपि२,३
११. लालनी१ — १२. रुद्रपुष्पिका१
१३. सिद्धपत्रो३
१४. "तीक्ष्णपत्रस्तीक्ष्णसारस्तीक्ष्णवल्को महामुनिः"३

आवर्त्तिनी चर्मरंगा रक्तपुष्पी च मोहिनी ।
तिक्तमज्जा तापसद्रुर्गरलोऽगारहिंगुदी[1] ॥ ९३ ॥
वेत्रो वचोग्र्यश्च[2] दीर्घवल्लिका पत्रदीर्घिका ।
शंखिनी तिक्तला तिक्ता यवतिक्ताक्षिपीडिकः[3] ॥ ९४ ॥
गूढपादा[4] क्षीरपाकी तिक्ताक्षी[5] सुकुमारिका ।
जिंगिणी[6] जंझिणी ज्ञेया मोचकी[7] गुडमंजरी ॥ ९५ ॥
आदारी गुच्छपत्री[8] स्याद् दार्वी खदिरवल्ल्यपि ।
दारिकादरिका दार्वी तरला मुर्मुरी मुरी ॥ ९६ ॥
आरामशीतला देवगन्धा कुक्कुटमर्दकः ।
उद्वेगजननस्तीक्ष्णः[9] क्षवकः[10] क्षुद्बिबोधकः ॥ ९७ ॥
राजक्षवस्तीक्ष्णगन्धः[11] क्रूरक्षवक एव च ।
झरसी[12] निर्जरा शुल्वपत्रिका[13] खरपत्रिका[14] ॥ ९८ ॥
कपित्थपत्रा शकुला जातिश्चित्रकपत्रिका ।
काकजंघा ध्वांक्षजंघा दासी वत्सा च जीवनी ॥ ९९ ॥
शरपुंखी बाणपुंखी नलिका[15] चञ्चला स्मृता ।
छगलान्त्री[16] त्रिवृत्पत्रा[17] बस्तान्त्री त्वृष्यगन्धिका[18] ॥१००॥

---

१. हिंगुदी तात्रसतरुर्गरलंगारहिंगुदी''२
२. वचोस्याति२ — ३. तिन्दुकः३
४. दृढ़वाला१, दृढपाकी३ — ५ रक्ताक्षी१
६. रोचकी२ — ७. जंघिनी२,३, शंखिनी१
८. मुचपत्री१,२
९. उद्वेगजनकः१ — १०. पावकः२
११. तीक्ष्णसारो२ — ११. जरसी१
१३. कुब्जा२ — १४ मुरपत्रिका२
१५. मणिका१ — १६. छगलाङ्घ्री३
१७. त्रिवृत्पीता१ — १८. विषगन्धिका३, वृक्षगन्धिका१,२

पत्रभंगा महाश्यामा शिलाभो[1] वृद्धदारुकः[2] ।
कटम्भरा महाश्वेता पालिंदी[3] कटभी च सा ॥१०१॥
क्षुद्रश्वेता सुनाभश्च किणिही बहुकण्टकः ।
मधुरेणुश्चारुशुण्डा[4] तथा पाटलपुण्ड्रकः[5] ॥१०२॥
काकाण्डश्चैव[6] चर्मारो पानहा[7] कांक्षतिप्रियः ।
प्रसारणी सुप्रसरा सारणी सुप्रसारिणी[8] ॥१०३॥
चारुपर्णी[9] राजफला[10] भद्रपर्णी प्रतानिका ।
मन्दारः पारिभद्राह्वो रोहिणः कण्टकिंशुकः[11] ॥१०४॥
रोहितः पारिजातश्च प्लीहघ्नो रक्तपुष्पकः ।
शुकनासा सूक्ष्मनालो नालिका[12] नहिका[13] च सा ॥१०५॥
विकस्या[14] शीतिका चैव मोहिनी वटपत्रिका[15] ।
निम्बच्छदेन्द्रवल्ली च कटभी रुचिरच्छदा[16] ॥१०६॥
कर्कोटकी वायसी च कंकणो[17] फलपूरकः[18] ।
उग्रकाण्डस्तोयवल्ली[19] कारवल्ली[20] सुकाण्डिका[21] ॥१०७॥
राजिका काण्डकटुका तीक्ष्णोष्णा[22] वस्तिदूषणः[23] ।

---

१. शिलादि२, स्थूलधू१
२. वृद्धकण्टकः१,२
३. कालिन्दी२
४. चोरतुण्डु३
५. पौण्ड्रकः१
६. सैव२
७. कर्मारो२
८. सरणी सारणी तथा१
९. चारुपुष्पी१
१०. लाजफला१ नागमाता२
११. कटु३
१२. महिला३
१३. महिका३
१४. दीना कुर्कुरिका चैव३
१५. मधुपर्णिका१
१६. कारभी गणिका च सा३
१७. कंकः स्यात्१
१८. फलमूलकः२
१९. सोमवल्ली२
२०. राजवल्ली२
२१. सुता स्मृता२
२२. तिक्तोष्णो१
२३. वह्निदूषकः२,३

रामाह्वार्कलता[1] रामा तरुणी यातुधानकी[2] ॥१०८॥
रम्यका सूर्यवल्ली च रक्तवल्ली[3] च सा स्मृता ।
पञ्चाङ्गुली लिंगबीजो राजिका पिण्डवत्फला[4] ॥ १०९ ॥
करम्भः कर्कशो युग्मफला चोत्तमवारुणी ।
तिल्वकः खदिरोष्ट्रः स्याच्छिखरी श्वेतरोध्रकः[5] ॥ ११० ॥
कांस्यं घोषं प्रकाशं च [6]काशपुष्पं तु तत्स्मृतम् ।

॥ इत्यभिधानरत्नमालायां चतुर्थः तिक्तस्कन्धः ॥

---

१. रामा वनिता३
२. भयनाकुली३
३. रक्तवर्णा१,२
४. कुण्डलद्रुमः३
५. कोद्रवः३
६ कांस्यं वृष्यं च संस्मृतम् १

९. अथ कटुद्रव्यस्कन्धः

चातुर्जातवरा[1]ङ्गजीरकयुगव्योषेभकृष्णानल-
ग्रन्थिध्या[2]मकरोहिषक्रिमिजितस्तालीसचव्यं नखः[3] ।
सर्पाक्षीसुरसाकुठेरलशुनक्षुद्रामिशी[4] बर्बरी ।
द्रोणीमूलकशिग्रुराजिहपुषा[5] वृश्चीवदन्तिद्वयम् ॥ १ ॥
सुरदारुहिंगुदीप्यकचोरक[6]च्छुरीतस्करीकौन्त्य-
स्तक्कोलजातिपत्रीफलमृगमदपूतिकुन्दुरुष्कः[7] ।
गन्धकदरदमनोह्वा तुत्थं भल्लातकांकोलौ,
कैडर्यपीलुचम्पकवासन्ती[8]मल्लिकुन्दविषमुष्ट्यः ॥ २ ॥
रूप्या[9] कन्दो वाष्पिका शंखपुष्पी,
वज्राक्षी च ब्रह्मदण्डीश्वरी च ।
सारंगेष्टा कामुका ब्रह्मसोमा,
रीतिर्ब्रह्माम्भः[10] कटुकस्कन्ध एषः ॥ ३ ॥
एला तु सूक्ष्मा सूक्ष्माद्या[11] भद्रैला तु महाधिका[12] ।
कपोतपर्णा[13] बहुला पृथ्वीका द्राविडी त्रुटिः ॥ ४ ॥
तमालपत्रकं पत्रं रोमशामलकीदलम् ।
हेमेभसञ्ज्ञं नागाह्वं केशरं नागकेशरम् ॥ ५ ॥

---

१. वराङ्ग३
२. ग्रामक२
३. तालीसचव्यानघाः१ ।
४. निशी१
५. हपुषा ३ वपुषा२
६. कर्चूर२ तस्करकच्छूरिः१
७. कुन्दुरुष्कतालम्१ कुन्दरुघालः२
८. वासन्तिकमल्लिका३
९. ऋष्याकन्दो२
१०. ब्रह्माम्भोऽपि१, ब्रह्माम्बुनामा३
११. सूक्ष्माख्या३
१२. महातुका३
१३. कपोतपर्णा२

लवंगचोचं भृङ्गत्वक्[१] शैवलं च वराङ्गकम् ।
लवंगपुष्पं श्रीपुष्पं भृंगाह्वं केशरं लवम् ॥ ६ ॥
वरालं[२] देवकुसुमं दिव्यं चन्दनपुष्पकम् ।
अजाजी जीरकं पीतं मेध्यं स्यादुत्तरापथम् ॥ ७ ॥
कृष्णजीरं[३] तुषा कालो कालिकोद्गारशोधनी[४] ।
जीरणः कारंभी[५] योनि[६]शूलघ्नी चोपकुञ्चिका[७] ॥ ८ ॥
शुण्ठी महौषधं विश्वं नागरं विश्वभेषजम् ।
कटुभद्रं शृंगबेरं भेषजं चार्द्रमार्द्रकम्[८] ॥ ९ ॥
पिप्पली मागधी कृष्णा वैदेही चपला कणा[९] ।
